# Muktichintamani Gayatri Kavacham

# મુક્તિચિન્તામણિ ગાયત્રીકવચમ્

## Document Information

Text title : Muktichintamani Gayatri Kavacham

File name : muktichintAmaNigAyatrIkavacham.itx

Category : devii, ShaTchakrashakti, kavacha, gAyatrI

Location : doc_devii

Proofread by : Aruna Narayanan

Latest update : December 24, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# મુક્તિચિન્તામણિ ગાયત્રીકવચમ્

શ્રીદેવ્યુવાચ -
ભગવન્ સર્વલોકેશ, વેદતત્ત્વાધિસાગર ।
સર્વજ્ઞ ભૈરવેશાન, જગન્નાથ કૃપાનિધે ॥ ૧॥

કવચં દેવ ગાયત્ર્યાઃ, સર્વતત્ત્વમયં પરમ્ ।
મુક્તિચિન્તામણિં નામ, ત્વયા મે પ્રાઙ્નિવેદિતમ્ ॥ ૨॥

મન્ત્રગર્ભં સુરૈઃ પૂજ્યં, સર્વાપત્તારણં વિભો! ।
બ્રહ્મવેધમયં બ્રૂહિ, યદ્યહં તવ વલ્લભા ॥ ૩॥

શ્રીભૈરવ ઉવાચ –
શૃણુ દેવિ ! પ્રવક્ષ્યામિ, તવ સ્નેહાદ્ રહસ્યકમ્ ।
કવચં તત્ત્વભૂતં તે, સર્વમન્ત્રૈક-વિગ્રહમ્ ॥ ૪॥

મુક્તિચિન્તામણિં નામ, ગાયત્રીમન્ત્ર-વિગ્રહમ્ ।
માતૃકાબીજનિલયં, વ્યાહૃતિબ્રહ્મસમ્મિતમ્ ॥ ૫॥

સર્વશક્તિમયં દેવિ ! સર્વારિષ્ટવિમર્દનમ્ ।
મહાપાતકવિઘ્નૌઘ-બ્રહ્મહત્યાદિનાશનમ્ ॥ ૬॥

વિનિયોગઃ-
ૐ અસ્ય શ્રીકવચસ્યાપિ, ઋષિઃ પ્રોક્તઃ સદાશિવઃ ।
ગાયત્રીદેવતા દેવિ, બીજં પ્રણવ ઈરિતઃ ॥ ૭॥

લક્ષ્મીશક્તિઃ શિવા ભીમા કીલકં સમુદાહૃતમ્ ।
ધર્માર્થકામમોક્ષાર્થે, વિનિયોગસ્તુ ધારણે ॥ ૮॥

એવં વિનિયુજ્ય-
ૐ અં શિરો મેઽવતાદ્દેવી, ગાયત્રી પરમાર્થદા ।
ૐ આં સૌઃ મેઽવતાદ્દેવી ભાલં વેદાર્થસુન્દરી ॥ ૧॥

ૐ ઇં હસૌઃ ભ્રુવૌ પાતુ, મમ તન્ત્રાર્થસુન્દરી ।
ૐ ઈં સૌઃ નયને પાતુ મમ વ્યાહૃતિસુન્દરી ॥ ૨॥

ૐ ઉં ઐં મેઽવતાત્ કર્ણૌ, સદા ભૂર્લોકસુન્દરી ।
ૐ ઊં ક્લીં મેઽવતાદ્ ગણ્ડૌ શ્રીભુવોલોકસુન્દરી ॥ ૩॥

ૐ ઋં શ્રીં મેઽવતાદ્ નાસાં સા સ્વર્લોકૈકસુન્દરી ।
ૐ ૠં હ્રીં મેઽવતાદોષ્ઠૌ મહર્લોકૈકસુન્દરી ॥ ૪॥

ૐ ઌં ક્લીં મેઽવતાદ્દન્તાઞ્જનલોકૈકસુન્દરી ।
ૐ ૡં ગ્લૌં મેઽવતાજ્જિહ્વાં તપોલોકૈકસુન્દરી ॥ ૫॥

ૐ એં ગાં પાતુ મે વક્ત્રં સત્યલોકૈકસુન્દરી ।
ૐ ઐં યં પાતુ મે કણ્ઠં સદાભુવનસુન્દરી ॥ ૬॥

ૐ ૐ ત્રીં પાતુ મે સ્કન્ધૌ, સદા બ્રહ્માણ્ડસુન્દરી ।
ૐ ઔં શ્રીં પાતુ મે બાહૂ સદા સર્વાઙ્ગસુન્દરી ॥ ૭॥

ૐ અં શ્રીં પાતુ મે હસ્તૌ, સદા સર્વાર્થસુન્દરી ।
ૐ અઃ હ્રીં પાતુ મે વક્ષઃ સદા દેવેન્દ્રસુન્દરી ॥ ૮॥

ૐ કં શ્રીં પાતુ મે પૃષ્ઠં, સદા દાનવસુન્દરી ।
ૐ ખં શ્રીં પાતુ મે પાર્શ્વૌઃ શ્રીવિદ્યાધરસુન્દરી ॥ ૯॥

ૐ ગં હ્રીં પાતુ મે કુક્ષી, અપ્સરોલોકસુન્દરી ।
ૐ ઘં ઐં પાતુ મે નાભિં યક્ષલોકૈકસુન્દરી ॥ ૧૦॥

ૐ ઙ પ્રિં મેઽવતાન્મેઢ્રં, રક્ષોલોકૈકસુન્દરી ।
ૐ ચં સ્ત્રીં મેઽવતાચ્છિશ્નં સદા ગન્ધર્વસુન્દરી ॥ ૧૧॥

ૐ છં હાં પાતુ મે ઊરૂ, સદા ગુહ્યકસુન્દરી ।
ૐ જં સ્વા પાતુ મે જાનૂ સિદ્ધલોકૈકસુન્દરી ॥ ૧૨॥

ૐ ઝં હ્રીં પાતુ મે તત્ર પૃથુલં માંસ-સઞ્ચયમ્ ।
ૐ ઞં ઐં પાતુ મે તત્ર દૃઢમસ્થિચયં સદા ॥ ૧૩॥

ૐ ટં સ્ત્રીં પાતુ મે જઙ્ઘે ભૂતલોકૈકસુન્દરી ।
ૐ ઠં પ્રિં પાતુ મે ગુલ્ફો નાગલોકૈકસુન્દરી ॥ ૧૪॥

ૐ ડં ઐં પાતુ મે પાદૌ મર્ત્યલોકૈકસુન્દરી ।
વિસ્મારિતં ચ તત્સ્થાનં યત્સ્થાનં નામવર્જિતમ્ ॥ ૧૫॥

ॐ ઢં હ્રીં પાતુ તત્સર્વં વપુસ્ત્રિપુરસુન્દરી ।
ॐ ણં હ્રીં પૂર્વં ઇન્દ્રોઽવ્યાત્ ॐ તં શ્રીં અગ્નિરગ્રતઃ ॥ ૧૬॥

ॐ થં હ્રીં દક્ષિણે ધર્મો, ॐ દં શ્રીં નૈઋત્યાં સ્વતઃ ।
ॐ ધં શ્રીં શ્રી વરુણઃ પાતુ પશ્ચિમે માં જલેશ્વરઃ ॥ ૧૭॥

ॐ નં શ્રીં વાયુતો વાયુર્વાયવ્વે માં સદાઽવતુ ।
ॐ પં શ્રીં મામુદરે પાતુ કુબેરોયક્ષરાટ્ સદા ॥ ૧૮॥

ॐ ફં યં મામીશ્વરઃ પાતુ સ્વયમીશાનનાયકઃ ।
ॐ બં ગાં ઊર્ધ્વમાત્મભૂર્ભગવાન્ સર્વદાઽવતુ ॥ ૧૯॥

ॐ ભં ગ્લૌં પાતુ માં વિષ્ણુરધસ્તાત્ સર્વદા હરિઃ ।
ॐ મં ભૈં મે ગુરુઃ પ્રાતઃ ॐ યં શ્રીં માં મધ્યવાસરે ॥ ૨૦॥

ॐ રં હ્રીં મેઽવતાત્ સાયં પરાત્પર-ગુરુસ્તથા ।
ॐ લં ક્લીં માં નિશીથેઽવ્યાત્ પરમેષ્ઠિ ગુરુઃ સદા ॥ ૨૧॥

ॐ વં ઐં માં નિશીથાન્તે પાતુ સાધક-નાયકી ।
ॐ શં શ્રીં માં ભગવતી બ્રહ્મરૂપા દિનેઽવતુ ॥ ૨૨॥

ॐ ષં હ્રીં માં જગન્માતા વિષ્ણુરૂપા સદાઽવતુ ।
ॐ સં ઐં માં વેદમાતા શિવરૂપા સદાઽવતુ ॥ ૨૩॥

ॐ હ્રં શ્રીં માં ચક્રતઃ પાતુ ગાયત્રી ચક્રનાયકી ।
ॐ (મૂલં) લં ક્ષ રૂપં માં પાયાત્ સદા સદ્બ્રહ્મનાયકી ॥ ૨૪॥

લક્ષ્મીર્લક્ષ્મીં સદા પાતુ, કીર્તિં કીર્તિઃ સદાઽવતુ ।
ધૃતિં-ધૈર્યં સદા પાતુ ધન્યા ભાગ્યં મમાઽવતુ ॥ ૨૫॥

સ્થિતં સ્થિતા સદા પાતુ, શાન્તિઃ શાન્તિં પ્રયચ્છતુ ।
વિભા દીપ્તિં સદા પાતુ મતિર્બુદ્ધિં મમાઽવતુ ॥ ૨૬॥

ગતિર્ગતિં ચ મે પાતુ, ભ્રાન્તિર્ભ્રાન્તિં સદાઽવતુ ।
નતિર્નતિં ચ મે પાતુ વાણી વાણીં પ્રયચ્છતુ ॥ ૨૭॥

સેના સેનાધિપત્યં મે, શોભા શોભાં પ્રયચ્છતુ ।
ક્રિયાદેવી ક્રિયાસિદ્ધિં નુતિર્નુતિં પ્રયચ્છતુ ॥ ૨૮॥

એતાઃ ષોડશપત્રસ્થાઃ, પાન્તુ માં સર્વતોભયાત્ ।

બ્રાહ્મી પૂર્વદલે પાતુ વહ્નૌ નારાયણી તથા ॥ ૨૯॥

દક્ષિણે પાતુ માં ચણ્ડી, નૈઋતે શામ્ભવી તથા ।
પશ્ચિમેઽપરાજિતાઽવ્યાત્કૌમારીવાયુકોણતઃ ॥ ૩૦॥

વારાહી ચોત્તરે પાતુ, ઈશાને નારસિંહિકા ।
રુરુઃ સઙ્ગ્રામતઃ પાતુ ચણ્ડો ભૂપભયાત્ સદા ॥ ૩૧॥

કરાલોઽવ્યાત્ શ્મશાને-માં સંહારોઽવ્યાત્ સમુદ્રતઃ ।
ભીષણઃ પાતુ દુર્ભિક્ષાત્ કાલાગ્નિઃ કાલપાશતઃ ॥ ૩૨॥

ઉન્મત્તઃ પાતુ માં ચૌરાત્ ક્રોધોઽવ્યાન્માં વિપત્તિતઃ ।
એતે સશક્તિકાઃ પાન્તુ વસુપત્રેષુ ભૈરવાઃ ॥ ૩૩॥

સરસ્વતી ગિરં પાતુ, સતી સત્યં સદાઽવતુ ।
દુર્ગા દુર્ગતિતો રક્ષેત્ સાવિત્રી વસુ રક્ષતુ ॥ ૩૪॥

શ્રીબ્રહ્મવાદિની જ્ઞાનં શ્રીમતીં શ્રિયમુત્તમામ્ ।
કુબ્જિકા ચ કુલં ક્ષિપ્રં પાશં સંસારબન્ધનાત્ ॥ ૩૫॥

તારિણી ચારિતો રક્ષેદ્ ધ્રુવં માં વિશ્વમઙ્ગલા ।
બહિર્દશાર-ચક્રસ્થા પાતુ માં સર્વતઃ સદા ॥ ૩૬॥

ત્રિપુરા પાતુ માં નિત્યં, કાલિકાઽવતુ માં સદા ।
તારા માં પાતુ સતતં સખી ચ સર્વદાઽવતુ ॥ ૩૭॥

બગલા પાતુ માં નિત્યં, બાલા માં પાતુ સર્વતઃ ।
બૈખરી પાતુ માં નિત્યં, દેવી તુર્યા સદાઽવતુ ।
છિન્નશીર્ષાવતાન્નિત્યં, પાતુ માં ભુવનેશ્વરી ।
અન્તર્દશારચક્રસ્થા દેવતા પાતુ માં સદા ॥ ૩૯॥

ગઙ્ગા માં પાવનં પાતુ, યમુના પાતુ સર્વદા ।
સરસ્વતી ચ માં પાતુ ત્રિકોણસ્થાશ્ચ દેવતાઃ ॥ ૪૦॥

મૂલવિદ્યા ચ માં પાતુ, ગાયત્રી ત્રિપદાસ્તવા ।
ચતુર્મુખઃ શિવઃ પાતુ પાતુ પદ્માસનઃ પ્રભુઃ ॥ ૪૧॥

અક્ષસૂત્રં ચ માં પાતુ, પદ્મં પાતુ શિવપ્રિયઃ ।
ત્રિશૂલં સર્વદા પાતુ લગુડં પાતુ સર્વદા ॥ ૪૨॥

મૂલં ચ સર્વદા પાતુ ચતુર્વિંશાક્ષરાત્મકમ્ ।

સર્વત્ર સર્વદા પાતુ પરમાર્થાધિદેવતા ॥ ૪૩॥

 ઇતિ મન્ત્રમયં દિવ્યં કવચં દેવ-દુર્લભમ્ ।
ગાયત્ર્યાસ્ત્રિપદા દેવ્યા લયાઙ્ગનિલયં પરમ્ ॥ ૪૪॥

મૂલવિદ્યામયં બ્રહ્મ, વિદ્યાનિધિમયં પરમ્ ।
સર્વદેવપ્રિયં મુક્તેઃ સાધનં ભુક્તિ-વર્ધનમ્ ॥ ૪૫॥

મુક્તિ-ચિન્તામણિર્નામ ગાયત્રી-તત્ત્વકારિણી ।
મારણં સર્વ-શત્રૂણાં વારણં સકલાપદામ્ ॥ ૪૬॥

તારણં ચ ભવામ્ભોધેઃ સર્વૈશ્વર્યૈકકારણમ્ ।
ર વૌ યો હ્યષ્ટગન્ધેન લિખેદ્ ભૂર્જે મહેશ્વરિ ! ॥ ૪૭॥

શ્વેતસૂત્રેણ સંવેષ્ટ્ય સૌવર્ણેનાથ વેષ્ટયેત્ ।
પઞ્ચગવ્યેન સંશોધ્ય ગાયત્રીરૂપેણ સ્મરેત્ ॥ ૪૮॥

તામર્ચયેન્મહાદેવિ ! વિધયા યન્ત્રરાજવત્ ।
મકારૈઃ પઞ્ચભિર્ગોપ્યૈર્મહાર્ચનક્રમેશ્વરઃ ॥ ૪૯॥

યથાર્થતસ્તત્ સમ્પૂજ્ય ગુટિં ભોગાપવર્ગદામ્ ।
બધ્નીયાત્ કણ્ઠદેશે તુ સર્વસિદ્ધિઃ પ્રજાયતે ॥ ૫૦॥

શિરઃસ્થા ગુટિકા દેવિ રાજલોક-વશઙ્કરી ।
ભૂતસ્થા ગુટિકા દેવિ ! રણે વિજયદાયિની ॥ ૫૧॥

કુક્ષિસ્થા રોગશમની, વક્ષઃસ્થા પુત્ર-પૌત્રદા ।
કણ્ઠસ્થૈશ્વર્યદા લોકે સર્વ-સારસ્વત-પ્રદા ॥ ૫૨॥

 ઇત્યેવં કવચં દેવિ! ગાયત્રીતત્ત્વમુત્તમમ્ ।
ગુહ્યં ગોપ્યતમં દેવિ! ગોપનીયં સ્વયોનિવત્ ॥ ૫૩॥

યહ કવચ અનેક મહત્ત્વપૂર્ણ તત્ત્વોં સે પરિપૂર્ણ હૈ । ઇસમેં સમસ્ત
શરીરાવયવોં કી રક્ષા કે લિએ ગાયત્રી સ્વરૂપ મેં હી વ્યાપ્ત મહાદેવિયોં
ઔર પ્રમુખ દેવોં કે સ્મરણ કે સાથ-સાથ બહુત-સે બીજ-મન્ત્રોં
કા યોગ કરકે રક્ષા કી પ્રાર્થના કી ગઈ હૈ । વસ્તુતઃ સાધના મેં આને
વાલે બાહ્ય- વિઘ્નોં ઔર આન્તરિક આપદાઓં સે બચને કે લિએ યહ અભેદ્ય
મણિમય કવચ હૈ ।

ઇસકા પુરશ્ચરણ અથવા પ્રમુખ પર્વ, ગ્રહણાદિ કે સમય પાઠ કરકે

ઇસે અષ્ટગન્ધ સે ભૂર્જપત્ર પર લિખે ઔર શ્વેત કચ્ચે સૂત સે ઉસે લપેટ કર સોને કે તાબીજ મેં રખે । તદનન્તર પઞ્ચગવ્ય સે સ્નાન કરાયે ઔર સાક્ષાત્ ગાયત્રી માતા કા સ્વરૂપ માનકર ઉસકી યન્ત્રાર્ચના કે સમાન હી અર્ચના કરે । તદનન્તર શરીર કે અવયવ-કણ્ઠ, ભુજા, કટિ આદિ મેં ધારણ કરે તો ઉસે ઐશ્વર્ય, સારસ્વત જ્ઞાન, પુત્ર-પૌત્ર ઔર દીર્ઘાયુ પ્રાપ્ત હોતે હૈં ।

ઇતિ શ્રીરુદ્રયામલે તન્ત્રે મુક્તિચિન્તામણિ ગાયત્રીકવચં સમાપ્તમ્ ।

Proofread by Aruna Narayanan

*Muktichintamani Gayatri Kavacham*
pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*